# मनीषा

संस्कृतविषयिणी शोधपत्रिका

# MANĪṢĀ

A Reseach Journal of Sanskrit

ISSN: 2583-2271
Vol -1 No. 1
2021

स्नातकोत्तरसंस्कृतविभागः
सबं-सजनीकान्तमहाविद्यालयः
लुटुनिया, पश्चिममेदिनीपुरम, ७२११६६, पश्चिमबङ्गः

# सूचीपत्रम्


| क्रमः | कीर्तिः | स्रष्टा / स्रष्ट्री | पुटम् |
|---|---|---|---|
| १ | अभिनवमङ्गलदशकम् | ड. गगनचन्द्रदे | १ |
| २ | न्यायवैशेषिकतन्त्रे मनस्तत्त्वम् | ड. विष्णुपदमहापात्रः | ३ |
| ३ | काव्यमार्गे शब्दवृत्तयः | ड. बुद्धेश्वरषडङ्गी | ९ |
| ४ | पण्डितराजजगन्नाथकृतकाव्यविभागस्यौचित्यम् | डा. चन्द्रकला आर्. कोण्डी | १३ |
| ५ | न्यायवैशेषिकमते कारणतावादविचारः | शिवप्रसादपोखेलः | १९ |
| ६ | जीवनं जलम् | ड. गोपीकृष्णन्-रघुः | २३ |
| ७ | कोरोनासंक्रमणनिराकरणे संस्कृतवाङ्मये उपादानानि | लक्ष्मीकान्तषडङ्गी | २६ |
| ८ | प्राकृतिकचिकित्सापद्धतिः | ड. जगमोहन-आचार्यः | ३१ |
| ९ | वैदिकभाषायामुपसर्गाणां व्यवहारः | ड. गगनचन्द्रदे | ३५ |
| १० | व्याकरणशास्त्रे पदविचारः | सुमन्तचौधुरी | ४१ |
| ११ | श्रीशिवरामेन्द्रसरस्वतीविरचितरत्न-प्रकाशदिशा कारके इति सूत्रार्थविचारः | सुकान्त मान्ना | ४८ |
| १२ | न्यायवर्त्मानुसारिव्याख्यानां करणविमृष्टौ प्रभावः | श्रीजीव-गोस्वामी | ५३ |
| १३ | आचार्यरघुनाथदिशा पदार्थतत्त्वसमीक्षणम् | दीपकगराइ | ५८ |
| १४ | न्यायमते अनुमानप्रमाणम् | सुरजित् मण्डलः | ६४ |
| १५ | चार्वाकनये अनुमानादेः प्रमाणत्वखण्डनम् | जयदेवदिण्डा | ६७ |
| १६ | वेदे नारीनामधिकारविमर्शः | सुचन्द्रा मुखर्जी | ७४ |
| १७ | देवीसूक्ते सृष्टिप्रक्रिया | निमाइ साँतरा | ७७ |
| १८ | वर्णानां सृष्टिप्रक्रियाविचारः | सुप्रिया-सुइ | ८० |
| १९ | दर्शनशास्त्रदृष्ट्या शिक्षकचरितसमीक्षा | गौराङ्ग-शो | ८३ |
| २० | कर्मण्येवाधिकारस्ते | सत्येन्द्रनाथ-आदकः | ८७ |
| २१ | कालिदासवर्णितेषु कारुण्यवियोगादिषु मानवेतराणां तादात्म्यानुभूतिः | कृष्णगोपालपात्रः | ९१ |
| २२ | अभिज्ञानशकुन्तले कालिदासस्य प्रकृतिभावना | सुस्मिता-दे | ९५ |
| २३ | लेखकपरिचितिः | | १०० |

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# न्यायवैशेषिकतन्त्रे मनस्तत्त्वम्

**ड. बिष्णुपदमहापात्रः**


## प्रबन्धसारः

*"ऋते ज्ञानान्न मुक्तिः", "विद्ययाऽमृतमश्नुते" इत्यादिश्रुत्या ज्ञायते यत परमपुरुषार्थस्य अपवर्गस्य प्राप्तिः ज्ञानमन्तरा नैव सम्भवति। अतः ज्ञानमेव मोक्षस्य परमं साधनम। तच्च ज्ञानं शास्त्राभ्यासात एव प्राप्तुं शक्यते। तदर्थम अनेकानि शास्त्राणि प्रथितानि सन्ति। तेषु शास्त्रेषु दर्शनशास्त्रमपि स्वीयं स्थानं सम्पादयति। वैदिकावैदिकदर्शनेषु न्यायवैशेषिकदर्शनयोः एकं मुख्यं स्थानं विद्यते। यद्यपि अनयोः दर्शनयोः पृथक्प्रस्थानत्वं विद्यते तथापि बहुस्थलेषु तत्त्वप्रतिपादनस्य साम्यत्वदर्शनात अनयोः समानतन्त्रत्वम। वैशेषिकदर्शनस्य मुख्यं लक्ष्यं भवति द्रव्यादिषड्पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं भवति। तेन तत्त्वज्ञानेन मोक्षस्यावाप्तिः, नव्यवैशेषिकमते अभावपदार्थमङ्गीकृत्य द्रव्यादिसप्तपदार्थानां तत्त्वज्ञानान्मुक्तिरिति। न्यायमते तु प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसमिति। वैशेषिकप्रस्थाने गुणाश्रयः कियाश्रयो वा द्रव्यमिति द्रव्यलक्षणं यदुक्तं तत्राद्यक्षणे द्रव्ये गुणकिययोरभावात तत्र द्रव्यलक्षणस्याप्तिरिति तद्वारणाय समवायिकारणत्वं द्रव्यत्वमिति द्रव्यस्य निष्कृष्टं लक्षणं स्वीक्रियते। तच्च द्रव्यं पृथिवी-जल-तेजो-वायु-आकाश-काल-दिग्-आत्म-मनोभेदेन नवविधं भवति। अन्तिमं यद्द्रव्यं मनो भवति तत्सर्वथा अणुरूपं भवति। तत्र पृथिव्यादिचतुर्णां नित्यानित्यभेदेन द्वैविध्यं परिलक्ष्यते। आकाश-काल-दिगात्मनां चतुर्णां विभुत्वं स्वीक्रियते। न्यायतन्त्रे प्रमेयम आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्ति-दोषप्रेत्यभावफलदुःखापवर्गभेदेन द्वादशविधं भवति। अत एतेषां नये षष्ठं प्रमेयं मनो भवति। तस्य मनसो द्रव्यत्वेन प्रमेयत्वेन वा ग्रहणं भवतु तत्र नैयायिकानां वैशेषिकाणाञ्च विप्रतिपत्तिर्नास्ति। मनसः किं लक्षणमिति जिज्ञासायां वैशेषिकैरुच्यते सुखाद्युपलब्धिसाधनमिन्द्रियं मन इति। अत्रेदमवधातव्यं यत ज्ञानमात्रं प्रति आत्ममनस्संयोगः कारणं भवति। सुखादिकम् आत्मनो विशेषगुणः। सुखादिकं तु आत्मनि समवायेन तिष्ठति। आत्मवृत्तिसुखादीनां कथं प्रत्यक्षं भवति इति जिज्ञासायां सुखादिसाक्षात्कारे साधनभूतं यदिन्द्रियमपेक्ष्यते तन्मन एव। अत एव सुखादिप्रत्यक्षस्य साधनमिन्द्रियं मनो भवति। परन्तु एतादृशं लक्षणं सर्वथा न रुचिकरं यत इन्द्रियलक्षणे शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति मनसः प्रविष्टत्वात् मनोलक्षणे इन्द्रियस्य प्रविष्टत्वाच्च भवति अन्योन्याश्रयः। तस्य अन्योन्याश्रयस्य वारणाय स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणमाचार्यैः स्वीकृतम्। एतस्य विश्लेषणं प्रबन्धे भविष्यति। एवञ्च मनसो विभुत्वे स्वीकारे सुषुप्त्यनुपपत्तिरिति वेदान्तमतं परित्यज्य मध्यमपरिमाणस्वीकारे अनित्यत्वापत्तिरिति जैनादिमतं परित्यज्य सुषुप्तेः संरक्षणाय मनसोऽणुत्वं नैयायिकैः वैशेषिकैश्च स्वीकृतम्। एतस्य तत्त्वस्य परिष्कारः प्रबन्धे कृतः। वस्तुतः मनसः सत्तास्वीकारे का युक्तिः, तत्र प्रमाणं विद्यते न वा, शास्त्रकाराणां किमभिमतमेतत्सर्वं मनसि निधाय प्रबन्धोऽयं निर्मितः।*


## उपोद्घातः

मिथ्याज्ञानजन्यवासनात्मके संसारे जीवानाम् आत्यन्तिकदुःखनिवृत्तये परमसुखस्य च प्राप्त्यते महर्षिभिः गौतमकणादप्रभृतिभिः सूत्रग्रन्थः निर्मितः। तत्र गौतमैः प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसस्य प्राप्तिर्भवतीति सूत्रितम्। तथा च सूत्र- "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[1] इति। वैशेषिकसूत्रकारैरपि द्रव्यादिपदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः इति सूत्रितम। तथा च सूत्रं "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्य-विशेषसमवायानां पदार्थानां तत्त्वज्ञानान्निःश्रेयसम"[2] इति। तत्र न्यायतन्त्रे प्रमाणादिषोडशपदार्थेषु प्रमेयपदार्थं आत्मशरीरा-दिभेदेन द्वादशविधो भवति।

[1] न्या.सू. 1.1.1
[2] वै.सू. 1.1.4

# मनीषा

(राष्ट्रिया संस्कृतशोधपत्रिका)

# MANĪṢĀ

(A National Journal of Sanskrit)

ISSN: 2583-2271

Vol -2 No. 1

2022

स्नातकोत्तरसंस्कृतविभागः

सबं-सजनीकान्तमहाविद्यालयः

लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः

# सूचीपत्रम्


| क्रमः | कीर्तिः | स्रष्टा / स्रष्ट्री | पुटम् |
|---|---|---|---|
| १ | चरित्रनिर्माणे उपनिषदः योगदानम् | प्रो. विष्णुपदमहापात्रः | १-५ |
| २ | वेदानुशीलने श्री-अरविन्दः | डॉ. लक्ष्मीकान्तषडङ्गी | ६-१२ |
| ३ | शक्तिविषये मीमांसकमतोपस्थापनम् | डॉ. अजयकुमारकरः | १३-१६ |
| ४ | प्रक्रियाक्रमः पाणिनीयव्याकरणञ्च | डॉ. गोपीकृष्णन्-रघुः | १७-२१ |
| ५ | रघुनाथभट्टाचार्याभिमताख्यातार्थविचारः | डॉ. नीरजकुमारभार्गवः | २२-३१ |
| ६ | संस्कृतव्याकरणस्य प्रसारे जानकीनाथ-भट्टाचार्यशास्त्रिमहोदयस्य अवदानम् | डॉ. प्रतिमभट्टाचार्यः | ३२-३७ |
| ७ | मिताक्षरागतकारकाधिकारीयसूत्राणां प्रत्युदाहरणपर्यालोचनम् | शुभमाझिः | ३८-४६ |
| ८ | पदशक्तिस्वरूपविचारः | विनयकुमारः | ४७-५१ |
| ९ | अक्षपाददर्शनदिशा प्रमाणविचारः | मिन्टु-दे | ५२-५६ |
| १० | न्याय-वैशेषिकदर्शनयोः अदृष्टतत्त्वविमर्शः | मलय-दे, डॉ. उत्तमविश्वासः च | ५७-६५ |
| ११ | रूपकालङ्कारनिरूपणे प्राचीननव्यन्यायमतयोः तुलनात्मकं विवेचनम् | डॉ. रत्नाकरखुण्टिआ | ६६-६८ |
| १२ | भगवद्ब्रह्मविरचिते गुण्डिचाशतके साहित्यश्रीः | डॉ. भारतभूषणरथः | ६९-७२ |
| १३ | विंशशताब्दिकं महाकाव्यं पाण्डवविक्रमम् | डॉ. सुबोधकुमारनन्दः | ७३-८१ |
| १४ | अध्यासरम्या च रामायणकथा | डॉ. अरविन्दमहापात्रः | ८२-८६ |
| १५ | गौडीयसंस्कृतसाहित्ये चम्पूकाव्यस्य उद्भवः विकासश्च | चन्दनमहान्ती | ८७-९६ |
| १६ | कालिदासीयदृश्यकाव्येषु वैदिकसंस्कारविमर्शः | डॉ. पापनचन्दः | ९७-१०२ |
| १७ | गुणस्वरूपनिरूपणे पण्डितराजजगन्नाथस्य विशेषत्वम् | मौमिताखाण्डा | १०३-१०७ |
| १८ | नाट्यकारभासस्य स्वाभिनव-नाट्यकौशलम् | सत्येन्द्रनाथ-आदकः | १०८-११४ |
| १९ | जन्मबन्धस्वरूपविचारः | दीपकमण्डलः | ११५-११७ |
| २० | गुणत्रयविचारः | डॉ. नेपालदासः | ११८-१२३ |
| २१ | साम्प्रतिकसन्दर्भे श्री-अरविन्दस्य शिक्षादर्शनं शिक्षाचिन्तनञ्च | तन्मयरायः | १२४-१२७ |
| २२ | कौटिल्यकालिकवाणिज्यनिर्वाहाधुनिक-कालिकवाणिज्यनिर्वाहयोः तुलनात्मकं विश्लेषणम् | देवसुजन-मुखार्जी | १२८-१३५ |

ISSN : 2583-2271
Vol. - 2. No. 1: 2022

# चरित्रनिर्माणे उपनिषदः योगदानम्

**प्रो. बिष्णुपदमहापात्रः**

**आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नई दिल्ली-११००१६**

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्य प्राधान्यात् सर्वदार्शनिकसम्मतत्वाच्च, स च मोक्षः ब्रह्मतत्त्वज्ञानमन्तरा नैव सम्भवति, ब्रह्मतत्त्वं केवलं सत्यतत्त्वं तदतिरिक्ततत्त्वस्य त्रिकालबाध्यत्वाद-सत्यत्वम्। अत एव श्रुतिः वदति "प्रज्ञानं ब्रह्म"[1] "अहं ब्रह्मास्मि"[2] "तत्त्वमसि"[3] "अयमात्मा ब्रह्म"[4] इति। एतेषां श्रुतिवाक्यानां तत्त्वमुररीकृत्य तत्त्वविवेचने वेदान्तिनां प्रवृत्तिः। परन्तु तादृशब्रह्मतत्त्वस्य प्राप्त्यर्थं यथा ज्ञानस्योपयोगित्वं तथैव तन्मूलकत्वेन सच्चरित्रस्य सत्संस्कारस्य, सत्समाजस्य, सद्गुरूपदेशस्य सच्छिक्षायाः, उपासनायाश्चोपयोगित्वं विद्यते। एतेषां ज्ञानं वेदान्तशास्त्राध्ययनेनैव सम्भवति, नान्यथा। तत्र वेदान्तो नाम वेदानामन्तः अर्थाद् उपनिषत्प्रमाणम्। उक्तञ्च, "वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च"[5]। वेदान्तशास्त्रस्य मुख्यप्रतिपाद्यविषयो भवति ब्रह्म, तद्-ब्रह्मतत्त्वमेव सततमुपासनीयम्, तस्योपासनेनैव चरित्रस्य निर्माणमवश्यम्भावि, एतेन "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" अस्याः श्रुतेश्चरितार्थत्वम्। अस्याः वेदान्तविद्यायाः अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽ-धिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तो-पासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता" इति वेदान्तविद्भिः उद्घोष्यते। एतादृशः ब्रह्मज्ञानाधिकारी जन्ममरणादिसांसारिकदुःख-पीडितप्रखरतरतरणिकिरणौष्णपीडितो मनुष्यः स्वक्लेशमपनुनुत्सुः सरोवरमिव उपनिषद्विद्या-निष्णातं गुरुमनुरूपपत्रपुष्पाद्युपहृतिपाणिरुपसृत्य श्रद्धातिशयपूर्वकं तदुपदिष्टमनुसरन्मनसा वाचा कर्मणा च तं वरीवस्यति। स च गुरुर्जिज्ञासावस्मिन्नति-दयालुरध्यारोपापवादन्यायेन ब्रह्मरूपमतिरहस्यमस्मै समुपदिशति, अत्रापि श्रुतिरेव प्रमाणम्, तथा च श्रुतिः "समित्पाणिः, श्रोत्रियं ब्रह्मनिष्ठम्", "तस्मै स विद्वानुपसन्नाय प्राह" इति।

[1] ऋग्वेदः

[2] यजुर्वेदः

[3] सामवेदः

[4] अथर्ववेदः

[5] वेदान्तसारः, पृ. २

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५३ ISSN : 2231-0452

# उत्कर्षदीपिका

(उत्कर्षमहोत्सवमुपलक्ष्य प्रकाश्यमाना महस्विन्याः विशेषसञ्चिका)

प्रधानसम्पादकः
आचार्यः जि.एस.आर्. कृष्णमूर्तिः
कुलपतिः

सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के. एस्.
डा. उदयन हेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(स्केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७५०७
2023

# उत्कर्षदीपिका

( उत्कर्षमहोत्सवमुपलक्ष्य प्रकाश्यमाना महत्त्विन्या: विशेषपत्रिका )

ISSN : 2231-0452

प्रकाशक:

**कुलसचिव:**

राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:।

© राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति: - ५१७५०७, आन्ध्रप्रदेश:।

संयोजक:

**अनुसन्धानप्रकाशनविभाग:**

राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

प्रकाशनवर्षम् : २०२३

प्रतिकृतय: : ३००

# उत्कर्षदीपिका
## शोधलेखानुक्रमणी

1. **भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि** 1

– प्रो.रामसलाहीद्विवेदी

2. **कालिदासीयाः केचनापत्यप्रत्ययान्ताः** 5

– प्रो. जयकान्तसिंहशर्मा

3. **सांख्यदर्शने मोक्षस्यावधारणा** 15

– प्रो.सुजातात्रिपाठी

4. **ईश्वरस्वरूपमीमांसा** 21

– प्रो.मारकण्डेयनाथतिवारी

5. विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम् 34

– डॉ. दयाल सिंह पंवार

6. **न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः** 38

– प्रो. बिष्णुपदमहापात्रः

7. **शिक्षाशास्त्रे नवीनाः विचाराः** 46

– आचार्य. के. भरतभूषणः

8. **वैदिकदर्शनानां** सृष्टिप्रक्रिया **प्रामाण्यवादस्य सन्दर्भे** 52

– प्रो.प्रभाकरप्रसादः

9. वैदिकवाङ्मये **कालविज्ञानस्य विविधपक्षाः** 58

– प्रो. प्रेम कुमार शर्मा

महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३

# न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः


**प्रो. बिष्णुपदमहापात्रः***

मिथ्याज्ञानजन्यवासनात्मके संसारे जीवानाम् आत्यन्तिकदुःखनिवृत्तये परमसुखस्य च प्राप्यते महर्षिभिः गौतमकणादप्रभृतिभिः सूत्रग्रन्थः निर्मितः। तत्र गौतमैः प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसस्य प्राप्तिर्भवतीति सूत्रितम्। तथा च सूत्रम्- "**प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः**" इति। वैशेषिक-सूत्रकारैऽपि द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयासधिगम इति सूत्रितम्। तथा च सूत्रम् - "**धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां तत्त्वज्ञानान्निःश्रेयसम्**" इति। तत्र न्यायतन्त्रे प्रमाणादिषोडशपदार्थेषु प्रमेयपदार्थः आत्मशरीरादिभेदेन द्वादशविधो भवति। तथा च सूत्रम् - "**आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्**" इति। द्वादशप्रमेयेषु षष्ठप्रमेयं भवति मनः। तस्य मनसः किं स्वरूपं, तस्य सद्भावे किं प्रमाणमिति जिज्ञासायां न्यायसूत्रकारैरुच्यते "**युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्**" इति।

तत्रेदमवधातव्यं यत् इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं भवति। प्रत्यक्षप्रमां प्रति इन्द्रियं करणं इन्द्रियार्थसन्निकर्षः व्यापारो भवति। इन्द्रियं तु वाह्य-आभ्यन्तरभेदेन द्विविधं भवति। वाह्येन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि, अन्तरिन्द्रियं तु मनो भवति। उक्तं च "**घ्राणरसनचक्षुस्त्वक्श्रोत्रणीन्द्रियाणि भूतेभ्यः**" इति। आत्मप्रत्यक्षे मनसः कारणत्वात् प्रत्यक्षलक्षणे तस्य मनसः अनुपादानात् या न्यूनता समापतति तस्याः न्यूनतायाः निराकरणार्थं भाष्यकारैः प्रतिपादितं प्रत्यक्षस्य यद्विशिष्टं कारणं इन्द्रियादिकं तस्यैवात्रोल्लेखः। आत्ममनस्संयोगस्य ज्ञानमात्रं प्रति कारणत्वात् अत्र तस्य नैवोल्लेखः। तथाहि - "**इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत् ज्ञानं तत् प्रत्यक्षम् । न तर्हि इदानीमिदं भवति, आत्मा मनसा संयुज्यते , मन इन्द्रियेण इन्द्रियमर्थेनेति । नेदं कारणावधारणमेतावत्**

* आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

विश्वसंस्कृतशास्त्रपरिषद्



ISSN : 2583-4630

# सुरधुनी
# SURADHUNI

अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका
(पुनरीक्षिता)

**An International Sanskrit E-Research Journal**

**(Peer Reviewed)**

**Thematic Areas and Sub-themes:**

प्राच्य-पाश्चात्यदर्शनयोः नैतिकताविमर्शः (Ethics in Indian and Western Philosophy)



Published by :
विश्वसंस्कृतशास्त्रपरिषद्
World Sanskritshastra Association

April-June 2023

Midnapore : West Bengal : India
http://www.suradhuni.in

सुरधुनी (Suradhunī)
अन्तराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-1, Issue-1, January-2022, Published by: World Sanskrit-Shastra Association (WSSA),
Name of Issuing- दर्शनतत्त्वविमर्श:(Darshan-Tattva-Vimarsh) (Page 1-3)

# अदृष्टतत्वविचार:

**डँ.बिष्णुपदमहापात्र:***

न्यायवैशेषिकनये द्रव्यगुणकर्मसामान्यविशेषसमवायाभावभेदात् सप्तपदार्था: प्रसिद्धा: सन्ति। तेषु सप्तपदार्थेषु द्वितीयपदार्थ: गुणो भवति। गुणास्तु रुपरसगन्धादिभेदेन चर्तुविंशतिप्रकारका: सन्ति। तत्र वैशेषिकसूत्रकारै: कणादै'रुपरसगन्धस्पर्श: संख्या परिमाणानि पृथकत्त्वं संयोगविभागौ परत्वापरत्वे बुद्धय; सुखदुखे इच्छाद्वेषौ प्रयत्नाश्च गुणा:',[१] इति विभागसूत्रे सप्तदश कण्ठेणोक्ता:। सूत्रस्थ च शव्देन गुरुत्वद्रवत्व-स्नेह-संस्कार-धर्माऽधर्मा-शब्दा: समुच्चिता: , ते सर्व मिलित्वा चतुर्विंशतिगुणा: प्रसिद्धा: सन्ति। एते सर्वे गुणा: समवायसम्बन्धेन द्रव्ये एव तिष्ठति। द्रव्यत्वं स्नेहसंस्कारावदृष्टं शब्द एव च,[२] इति कारिकायां प्रतिपादित योहि अदृष्टशब्द: स धर्मस्य अधर्मस्य च वाचक:। तच्चादृष्टं कार्यत्वावच्छिन्नं प्रति साधारणकारणम् तथाहि ईश्वरस्तज्ज्ञाकृतय: प्रागभावकालदिगदृष्टानि[३] इति। अदृष्टञ्च जीवात्मवृत्ति:। धर्माधर्मयोप्रत्यक्षत्वात् तयोरदृष्टमिति संज्ञा । अदृष्टापराभिधानस्य धर्मस्य लक्षणं सूत्रकारै कणादै उक्तं- यतोऽभ्युदयनि:श्रेयससिद्धि: स धर्म:[४], धर्मविशेषप्रसूताद...,[५] आत्मान्तरगुणानामात्मान्तरेकारणत्वात्,[६] दृष्टानां दृष्टादृष्टप्रयोजनानां दृष्टाभावे प्रयोजनमभ्यदयाय७। एभि: सूत्रै: वैशेषिकसूत्रकारै: अदृष्टस्य महत्वं, आत्मगुणत्वं, आत्ममनसो: सहयोगात् अदृष्टस्योत्पत्तिरितिकथनम्, वर्णाश्रमिणां कृते धर्मस्य निमित्तकारणत्वं, धर्मस्य कार्यं यत्सुखमोक्षादिकं भवति तस्य साधनत्वेन धर्मस्य प्रतिपादनमित्यादिविषयादिविषयानालोड़नं कृतमिति। चार्यै: सूत्राणां ब्याख्यानावसरे प्रसस्तपादाचिर्ये-धर्म: पुरुषगुण:, कर्तु: प्रियहेतुमोक्ष:, अतीन्दिय:, अन्त्यसुखसंविज्ञानविरोधी, पुरुषान्त:करणसंयोगवि-शुद्धाभिसन्धिज:— वर्णाश्रमिणं सामान्यविशेष-भावेनावस्थितानि द्रव्यगुणकर्माणि, इति।[८]

तत्र धर्मस्य सामान्यसाधनानि भवन्ति धर्मे श्रद्धा, अहिंसा भुतहितत्वम्, सत्यवचनम,अस्तेयम्, बह्मचर्यम्,अनुपधा, क्रोधवर्जनम्, अभिसेचनम्, शुचिद्रव्यसेवनम्, विशिष्टदेवताभक्ति:, उपवासोऽप्रमादश्च। ब्राह्मणक्षत्रियवैश्यानां कृते सामान्यानि धर्मसाधनानि इज्याध्ययनदानानि भवन्ति। ब्राह्मणस्य विशेषसाधनानि प्रतिग्रहाध्यपनयाजनानि स्ववर्णविहिताश्च संस्कारा: क्षत्रियस्य कृते सम्यकप्रजापालनम्, वैश्यस्य कृते

*आचार्य: नव्यन्यायविभाग, श्री.ला.ब.शा.रा.सं.विश्वविद्यालय:, नवदेहली, भारतवर्षम्।

ISSN - 2347 - 5889

# श्रीजगन्नाथज्योतिः

(A PEER - REVIEWED RESEARCH JOURNAL OF INDOLOGY)

Vol. LXVI (66) Year - 2023

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः

सत्यम् ज्ञानम् अनन्तम्

Chief Editor

**PROF. (DR.) RABINDRA KUMAR PANDA**

Editors

Dr. Priyabrata Mishra Dr. Niranjan Kar

अग्रीयसंस्कृतगवेषणाकेन्द्रम्

Center of Advanced Research in Sanskrit

Sri Jagannath Sanskrit University

Shrivihar, Puri-3, Odisha

| Subject | Author | Page |
|---|---|---|
| ९. पालिभाषायाः सम्यगनुशीलनम् | *डॉ. निरञ्जनकरः* | 5 |
| १०. प्रत्यक्षप्रमाणस्वरूप-विमर्शः | *डॉ. महेशझा* | 65 |
| ११. माघकाव्ये न्यायदर्शनम् | *डॉ. विष्णुपदमहापात्रः* | 82 |
| १२. नाट्यशास्त्रदृशा उत्तररामचरितस्य समीक्षा | *डॉ.वसन्तकुमारमिश्रः* | 92- |
| १३. चतुःषष्टिः कलाः | *डॉ. लक्ष्मीनारायणबेहेरा* | 106- |
| १४. शिक्षा प्राचीनाऽर्वाचीना च | *प्रो. ललितकुमारसाहुः* | 119- |
| १५. मनसः वैज्ञानिकत्वप्रसक्तिः | *डॉ. लक्ष्मीधरपण्डा* | 125 |
| १६. शाङ्करी दृङ्मीमांसा | *प्रो.कमलेशमिश्रः* | 134 |
| १७. न्यायवैशेषिकयोरदृष्टकारणविचारः | *प्रो.एन्.आर्.शठकोपताताचार्यः* | 139 |
| १८. न्यायपूर्वाङ्गविमर्शः | *डॉ. जि. जयमाणिक्यशास्त्री* | 146 |
| १९. इक्परिभाषायां पदोपस्थितिपक्षसमीक्षा | *डॉ. पूर्णचन्द्रपाढी* | 153 |
| २०. आधुनिकसंस्कृतसाहित्यस्य संक्षिप्तपरिचयः | *डा. पराम्बाश्रीयोगमाया* | 160 |
| २१. श्रीमद्भागवते भारतीयसंस्कृतिसमीक्षणम् | *डा. देवाशिषत्रिपाठी* | 175 |

# माघकाव्ये न्यायदर्शनम्

**विष्णुपदमहापात्रः**

नतास्मिन् यदुनन्दनः स भगवान् वीरप्रधानो रसः
शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना।
इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं
धन्यो माघकविर्वयं तु कृतिनः तत्सूक्तिसंसेवनात्।

इह खलु जगति धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् तस्य मोक्षस्यावाप्तये समेषां दार्शनिकानां प्रथा प्रवृत्तिः दृश्यते तथैव साहित्यिकानामपि दृश्यते। साहित्यशास्त्रस्य मुख्यप्रयोजननिरूपणावसरे काव्यकारैः इत्थमुद्घोषितम् –

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते [१]।"
"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् [२]।।

एतादृशं प्रयोजनमभ्युपेत्य माघकविना सप्तमशताब्द्यां विंशतिसर्गात्मकं शिशुपालबधनामकं महाकाव्यं विरचितम्। काव्यसंरचनावसरे यद्यपि काव्यकारैः विधिपक्षमुत्सृज्य स्वानुसारं काव्यं रचितं "नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् । नवरसरुचिरां निर्मितिमादधती ......" तथापि प्रयोजनपक्षः कदापि नैव उपेक्षितः । माघकविना तु काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति वचनमपि समाख्याति काव्यरचनायाम्। अत एव क्षेमेन्द्रेण औचित्यविचारचर्चाग्रन्थे तत्त्वौचित्यस्य प्रत्युदाहरणरूपेण माघश्लोकस्य उद्धरणं प्रस्तुतं –

बुभुक्षितैर्व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते ।
न विद्यया केनचिदुधृतं कुलं हिरण्यमेवार्जय निष्फलाः कलाः ।।

Vol.-3 No.-1
Year-2023

ISSN : 2583-2271

# मनीषा

(संस्कृतविषयिणी शोधपत्रिका)

# MANĪṢĀ

(A Research Journal of Sanskrit)

**DOUBLE-BLINDED PEER REVIEWED JOURNAL**

स्नातकोत्तरसंस्कृतविभागः

सबं-सजनीकान्तमहाविद्यालयः

लुटुनिया, पश्चिममेदिनीपुरम्-७२११६६, पश्चिमबङ्गः

# सूचीपत्रम्


| क्रमः | प्रबन्धाः | लेखकनाम | पत्रसंख्या |
|---|---|---|---|
| १ | श्रीगौडीयवैष्णवदर्शनदिशा प्रमेयतत्त्वविचारः | प्रो. बिष्णुपद-महापात्रः | १-८ |
| २ | नागेशाभिमतकरणतृतीयार्थविमर्शः | डॉ. नीरजकुमारभार्गवः | ९-१५ |
| ३ | ऋधातोः वैदिकरूपाणि | डॉ. सुबोधकुमारनन्दः | १६-१९ |
| ४ | पाणिनीयव्याकरणे विद्या | डॉ.गिरिधारी-पण्डा | २०-२५ |
| ५ | मीमांसादृष्ट्या अङ्गस्वरूपविमर्शः | डॉ. गोपीकृष्णन्-रघुः | २६-२८ |
| ६ | नैषधीयचरिते मानवीयचरितम् | डॉ. लक्ष्मीकान्त-षडङ्गी | २९-३३ |
| ७ | पाणिनीयव्याकरणे णत्वविधानसमीक्षायां निषेधविकल्पस्थलम् | डॉ. सुदीपमण्डलः | ३४-३८ |
| ८ | लोकोपकाराय श्रीमद्भगवद्गीता | शान्ति-घोषः | ३९-४५ |
| ९ | केनोपनिषदन्तर्गतयक्षोपाख्यानस्य माहात्म्यवर्णनपुरःसरं सामाजिकप्रेक्षणनिरूपणम् | सदानन्द-दासः | ४६-५० |
| १० | वर्तमानसमये औपनिषदीयशिक्षायाः प्रासङ्गिकता | पापिया-गँडाइ | ५१-५६ |
| ११ | उपनिषदीयसद्भावनायां मानविकतावादः | सत्येन्द्रनाथ-आदकः | ५७-६० |
| १२ | कौण्डभट्टदिशा शक्तिस्वरूपविचारः | डॉ. स्वर्णलता-पण्डा | ६१-६८ |
| १३ | शाब्दिकानां नामार्थः | उत्तम-घोषः | ६९-७५ |
| १४ | उपसर्गार्थचन्द्रिकायां संकलितानां किरातार्जुनीयस्थ-अनूपसृष्टप्रयोगाणां विश्लेषणम् | सुखदेव-साउः | ७६-८१ |
| १५ | श्रीभावबोधिनीदिशा "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्" इति सूत्रे विध्यादिपदोपादानप्रयोजनम् | शुभङ्कर-वर्मणः | ८२-८५ |
| १६ | स्वतन्त्रा ऋषयः | कृष्णपद-रुइदासः | ८६-८९ |
| १७ | "भाव्यमानोऽण् सवर्णान्न गृह्णाति" "अर्थवद्ग्रहणे नानर्थकस्य" इत्यनयोः परिभाषयोः समीक्षात्मकमध्ययनम् | अमितकुमार-साउः | ९०-९४ |
| १८ | कारकाह्निके ध्रुवमपायेऽपादानम् | पिण्टु-दे | ९५-९७ |
| १९ | न्यायवैशेषिकदर्शनदिशा कारणतावादविमर्शः | विप्लव-सरकारः | ९८-१०३ |
| २० | न्यायनये मुक्तिवादस्य स्थानम् | दीपक-मण्डलः | १०४-१०७ |
| २१ | सादृश्यपदार्थविमर्शः | अलोक-सेनः | १०८-११४ |
| २२ | न्यायदर्शने आत्मतत्त्वमीमांसा | मिन्टु-दे | ११५-११७ |
| २३ | न्यायाभिमतानुमानप्रमाणस्वरूपविमर्शः | सुमनकल्यानसामन्तः | ११८-१२२ |
| २४ | न्यायमते हेत्वाभासविचारः | विश्वभूषण-मिश्रः | १२३-१२९ |
| २५ | न्याय-वैशेषिकयोः द्रव्यचिन्तनकौशलम् | शान्तनु-दासः | १३०-१३३ |
| २६ | प्रत्यक्षं ज्योतिषं शास्त्रम् | सत्यव्रत-वेहेरा | १३४-१३८ |
| २७ | आयुर्वेददृष्ट्या जीवनस्य संक्षिप्तवर्णनम् | सुशान्त-मण्डलः | १३९-१४२ |
| २८ | महाकविभासरूपकेषु आश्रमवर्णनम् | विनयकुमार-वरः | १४३-१४७ |

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# श्रीगौडीयवैष्णवदर्शनदिशा प्रमेयतत्त्वविचारः

**प्रो. बिष्णुपद-महापात्रः**
**आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*वेदान्तपरम्परायाम् अचिन्त्यभेदाभेदस्य सिद्धान्तः अतीवरमणीयः। यतोहि एतेषां नये ब्रह्मशब्देन श्रीकृष्णस्य एव बोधो भवति। कृष्णस्तु अद्वयानन्दः, चिदानन्दः, सर्वेश्वरः, आत्मा, ब्रह्म, आत्मनः आत्मा, परमात्मा, सर्वाश्रयः, शक्तित्रयविशिष्टः, अनन्तस्वरूपविशिष्टश्च भवति। कृष्णे यदि भक्तिः स्यात् तर्हि कदापि अज्ञानस्य प्रसक्तिरेव नैव सम्भवति। अर्थात् कृष्णस्तु कर्तुमकर्तुमन्यथाकर्तुं समर्थो भवति। अतः एव- 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज'। तत्र चिच्छक्ति-स्वरूपशक्ति-अन्तरंगाशक्तिभेदेन शक्तिस्त्रिविधा भवति। तत्र बहिरंगा मायाशक्तिः जगतः कारणं भवति। तस्याः शक्तेः वैभवं तु अनन्तं भवति। जीवशक्तिस्तु तटस्थाख्या भवति, तस्याः शक्तेः अनन्तत्वं नास्ति। मुख्यतः शक्तेः त्रिविधत्वेऽपि भेदवशात् अनन्तत्वं स्वीक्रियते। अस्याः समग्रशक्तेः आश्रयः भगवान् कृष्ण एव। सच्चिदानन्दस्वरूपः भगवान् श्रीकृष्णचन्द्रः। आनन्दांशे ह्लादिनीशक्तिः। ह्लादिनीशक्तेः सारस्तु प्रेमभावः, महाभावस्तु सर्वेषु भावेषु श्रेयस्करः। सदंशे सन्धिनीशक्तिः। सा शुद्धसत्त्वप्रधानभूता। भगवति सत्तायां तस्याः शक्तेः विश्रामः। माता-पिता-गृहादिकं तु कृष्णवृत्तिशुद्धसत्त्वस्य विकारभूतं भवति। चिदंशे संविच्छक्तिः। कृष्ण-भगवत्-तत्त्वज्ञानादिकं तस्याः शक्तेः सारभूतं भवति। ब्रह्मज्ञानादिकं तु तस्याः परिवारो भवतीति। ह्लादिनीशक्तेः चरमोत्कर्षभूतः यो हि महाभावः स तु श्रीराधाकृष्णकान्ता एव । तथाहि-*

*"महाभाव स्वरूप श्रीराधाठाकुराणी ।*
*सर्वगुणखानि कृष्ण कान्ता शिरोमणि"*

*अस्य दर्शनस्य मुख्यं भाष्यं भवति गोविन्दभाष्यम्। तत्र भाष्ये सिद्धान्ते च यानि यानि तत्त्वानि विद्यन्ते तेषां स्वरूपमत्र समुपस्थापितं विद्यते।*

**कुञ्चीशब्दाः** -जीवस्तु कृष्णस्य दासः, विशिष्टपुरुषः ईश्वरः अवतारपदवाच्यः, आनन्दांशे ह्लादिनीशक्तिः, सदंशे सन्धिनीशक्तिः, चिदंशे संविच्छक्तिः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

भारतीयदार्शनिकपरम्परायां बहूनि दार्शनिकप्रस्थानानि तत्तदाचार्यैः प्रस्थापितानि। तेषु दार्शनिकप्रस्थानेषु बहवः वादाः परिलक्ष्यन्ते। तथाहि- वैदिकदार्शनिकेषु सांख्यैः पञ्चविशतितत्त्वमाधारीकृत्य तत्र प्रकृतेः जगत्कारणत्वमभ्युपेत्य सत्कार्यवादः व्यवस्थापितः। योगदार्शनिकैः सांख्याभिमततत्त्वेषु ईश्वरतत्त्वं संयुज्य सत्कार्यवादः परिणामवादश्च संस्थापितः। नैयायिकैः षोडशपदार्थतत्त्वमङ्गीकृत्य वैशेषिकैश्च सप्तपदार्थवादं स्वीकृत्य आरम्भवादः असत्कार्यवादः जीवेश्वरयोश्च द्वैतवादः व्यवस्थापितः। वेदान्तप्रस्थानेषु आचार्याणां लक्ष्यैकत्वेऽपि प्रस्थानभेदेन बहवः वादाः दरीदृश्यन्ते। आचार्यशंकरमते अद्वैतवादः, श्रीरामानुजाचार्यमते विशिष्टाद्वैतवादः, मध्वाचार्यमते द्वैतवादः, बल्लभमते शुद्धाद्वैतवादः, निम्बार्कमते द्वैताद्वैतवादः, श्रीचैतन्यमते अचिन्त्यभेदाभेदवादश्च प्रसिद्ध इति इह जगतितले अवलोक्यते।

तत्र अचिन्त्यभेदाभेदवादस्य प्रतिष्ठापकाचार्यस्य श्रीचैतन्यमहाप्रभोः जन्म- ढाकान्तर्गतश्रीहट्टमण्डले फाल्गुनमासस्य दोलपूर्णिमायां शुभमुहूर्ते १४८५-ख्रीष्टाब्दे अभवत्। श्रीचैतन्यमहाप्रभोः पितुर्नाम जगन्नाथमिश्रः मातुः नाम शचीदेवी च आसीत्। बाल्यकाले शिक्षार्जनाय नवद्वीपं प्राप्तवान्निति प्रवादः श्रूयते। यद्वा भवतु तेषां कृष्णभक्तिः कृष्णनामसङ्कीर्तनमेव मुख्यं लक्ष्यमासीत्। काश्यां स्वीयशिष्यं श्रीमन्तं सनातनं प्रति तत्त्वोपदेशवेलायां जीव-जगद्-ईश्वर-तत्त्वादिविषयकं भक्ति-उपासनाप्रणाली-

Ref. No.: WSSA /JULY-SEPTEMBER, 23 / 13

Dated: 31/10/2023

# सुरधुनी
# Suradhunī

AN INTERNATIONAL SANSKRIT E-RESEARCH JOURNAL
(PEER REVIEWED)

अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)

ISSN: 2583-4630

**Publisher:** World Sanskritshastra Association (WSSA), Ber Ballavpur, Kotwali, Near Water Tank & Health Centre, Word No.-16, Midnapore, Paschim Medinipur, West Bengal, India, Pin-721101
**(http://www.suradhuni.in)**

## CERTIFICATE OF PUBLICATION

*This is to certify that the research article entitled*

"..............................................................................."

*authored by Prof./Dr./Mr./Mrs./Ms.* ...............................................

*has been published in* SURADHUNĪ – *an International Sanskrit E-Research Journal (Peer Reviewed) in July-September, 2023 Vol.* ............, *Issue* ........., *Page No.* ........... *to* ..........

## प्रकाशनप्रमाणपत्रम्

प्रमाणीक्रियते यत् प्रो./ड./श्री/श्रीमती/कुमारी ..........प्रो. विष्णुपद-महापात्रः..........

महोदयस्य/महोदयायाः "..........अपवर्गकारणविमर्शः.........."

इत्यभिधेयं गवेषणापत्रं "सुरधुनी" इति अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता) इत्यस्यां जुलाइ-सितम्बर, २०२३ मासस्य .....३..... संख्यायाम् .....३..... तमे खण्डे .....११७..... पृष्ठाङ्कात् .....१२६..... पृष्ठाङ्कं यावत् प्रकाशितं जातम्।

**Editor / सम्पादकः**

Mr. Rajib Sinha

**Co-Editors / सह-सम्पादकाः**

Dr. Shiladitya Satpathi
Mr. Asit Kumar Sau
Dr. Subhamoy Pahari

**Associate-Editors / सहायोगीसम्पादकाः**

Dr. Palash Biswas
Dr. Shyam Sundar Sharma
Mrs. Sharaddha Upadhey
Dr. Biswajit Mondal

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

# अपवर्गकारणविमर्शः

## प्रो. बिष्णुपदमहापात्रः*

इह खलु जगति धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् संसारदु:खवासना-दिनिवृत्तिरूपत्वात् सांसारिकदु:खवासनानां चासह्यत्वात् न्याय- दर्शनानुसारेण मोक्षप्रयोजकीभूतज्ञानसिद्धयार्थं तादृशज्ञानविज्ञेयपदार्थसमूहनिरूपणार्थं विवेचकानां प्रवृत्ताये ''प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्क- निर्णयवादजल्पवितण्डा हेत्वाभासच्छलजाति -निग्रहस्थानानां तत्त्वज्ञानान्नि:श्रेयसाधिगम:''[1] इति परमकारुणिको भगवान् अक्षपाद: आदावसूत्रयत्। न्यायसूत्रकारस्याशयं विवृणोति मणिकार: ''अथ जगदेव दु:खपङ्कनिमगग्नमुद्दि-धीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनि: प्रणिनाय''[2] इति।

''ऋते ज्ञानात्र मुक्ति:, विद्ययाऽमृतमश्नुते, विद्यया विन्दतेऽमृतम्'' इत्यादिश्रुत्या ज्ञायते यत् तत्त्वज्ञानमन्तरा अपवर्गस्यावाप्ति: नैव सम्भवतीत्यत: तत्त्वज्ञानस्यास्ति अपवर्गसाधनत्वमिति। तादृशतत्त्वज्ञानप्राप्तये समे दार्शनिका: वैयाकरणा: साहित्यिका: पौराणिकादयच सततं प्रयत्नशीला: दरीदृश्यन्ते। तत्त्वज्ञानेन यो हि मोक्ष:, स चापवर्ग: आत्यन्तिकदु:खनिवृत्तिरूप:। आत्यन्तिकदु:खनिवृत्ते: मोक्षरूपत्वे नास्ति काचिद् विप्रतिपत्ति:। उक्तं च किरणावल्यामुदयनाचार्येण ''नि:श्रेयसं पुनर्दु:खनिवृत्तिरात्यन्तिकी, अत्र च वादिनामविवाद एव। न ह्यपवृत्त्कस्य दु:खं प्रत्यापद्यत इति कचिदभ्युपैति''[3] इति। न्यायसूत्रकारै: 'दु:खेनात्यन्तं विमुक्तचरतीष्टति श्रुत्यनुसारं ''तदत्यन्तविमोक्षोऽपवर्ग:''[4] अर्थात् ''बाधनालक्षणं दु:खम्''[5] पीडास्वरूपं सत् यद् दु:खं तत्र वस्तुतो दु:खमात्मसमवेतमेव अथापि तादृशदु:खजनकत्वात्

*आचार्य:, न्यायविभाग:, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:

UGC CARELISTED
ISSN 2277-713X

# वयम्

**रचना-परम्परा-गवेषणाधारिता**

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य त्रैभाषिकी षाण्मासिकी शोधपत्रिका

## संयुक्ताङ्कः-34-35

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः

**मदाऊ, भांकरोटा, जयपुरम्-302026 (राज.)**

# वयम्

## रचना-परम्परा-गवेषणाधारिता


जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य त्रैभाषिकी षाण्मासिकी शोधपत्त्रिका

वि.सं. २०७९-८० संयुक्ताङ्कः- ३४-३५ जून-दिसम्बरमासः २०२३



प्रधानसम्पादकः

प्रो. रामसेवक दुबे

कुलपतिः

♦

निदेशकः

डॉ. राजधरमिश्रः

अनुसन्धानकेन्द्रम्

♦

सम्पादकः

डॉ. महेश शर्मा (शास्त्री कोसलेन्द्रदासः)

प्रकाशन प्रभारी

अनुसन्धानकेन्द्रम्

♦

सह-सम्पादकः

डॉ. संदीप जोशी

डॉ. देवेन्द्रकुमारः

♦

प्रबन्धसम्पादकः

प्रियव्रतसिंहचारणः

कुलसचिवः



जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः

जयपुरम्-३०२०२६ (राज.)

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| 1. | तद्धिताधिकारीयप्रकृतिप्रत्यययोरर्थस्य च विश्लेषणम् | प्रो० विष्णुकान्तपाण्डेय: | 01 |
| 2. | प्रत्यभिज्ञादर्शनस्य समाजोपयोगिता | प्रो. रमाकान्तपाण्डेय: | 07 |
| 3. | व्याकरणशास्त्रे उपसर्गविचार: | नरेशसिंह: | 14 |
| 4. | आश्रयो विभक्त्यर्थ: | प्रो. भारतभूषणत्रिपाठी | 20 |
| 5. | गौडीयवैष्णवमते मुक्तिसाधनम् | प्रो. बिष्णुपदमहापात्र: | 26 |
| 6. | व्याकरणविनोदसमासपरिच्छेदसमीक्षा | डॉ. दयारामदास: | 29 |
| 7. | परस्मैपदात्मनेपदयो: अपवादशास्त्रविवेचनम् | शान्ति मीना | 32 |
| 8. | श्रौतार्थसंग्रह-विमर्श | अंकुर नागपाल | 35 |
| 9. | आधुनिक संस्कृत साहित्य में वैश्विक चिन्तन का अनुपम निदर्शन - पत्रदूतम् | डॉ. कल्पना शृंगी | 45 |
| 10. | भट्टारकदेवशक्रविरचितप्रतापकाव्यस्य त्रयोदशसर्गस्य सम्पादनमध्ययनञ्च | डॉ. शशिकुमारशर्मा | 51 |
| 11. | भारतीयदर्शने प्राणमीमांसा | अनिल कुमार शर्मा | 56 |
| 12. | अन्न का विज्ञान | डॉ. गुलाब कोठारी | 61 |
| 13. | New Horizons in Sanskrit Literary Theory | Radhavallabh Tripathi | 66 |
| 14. | संस्कार : नामकरण, निष्क्रमण और समावर्तन | डॉ. महेश शर्मा (शास्त्री कोसलेन्द्रदास) | 75 |
| 15. | नाट्यशास्त्रे औचित्यम् | एकता शर्मा | 85 |
| 16. | कर्म-कर्तृत्व सम्बन्ध विमर्श | डॉ. शम्भु कुमार झा | 89 |
| 17. | मन्दस्पष्टग्रहस्थितिविमर्श: | डॉ. शिवाकान्तमिश्र: | 93 |
| 18. | Mother-gender Educators and Their Personality Traits with Reference to Ancient Indian Literature | Lavleena Trivedi | 100 |
| 19. | संस्कृतवाङ्मये सैन्यसमीक्षणम् | डॉ. मधुबालाशर्मा | 104 |
| 20. | संस्कृत ग़ज़ल की विकासयात्रा | डॉ. अरुण कुमार निषाद | 110 |
| 21. | आयुर्वेदग्रन्थेषु जन्तुविज्ञानम् | डॉ. संदीपजोशी | 124 |

# गौडीयवैष्णवमते मुक्तिसाधनम्

**प्रो.बिष्णुपदमहापात्रः**
न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,नवदेहली

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्रधानपुरुषार्थत्वम् । मोक्षाख्यपुरुषार्थस्य प्राप्त्यर्थं सर्वे दार्शनिकाः साहित्यिकाः सर्वे शास्त्रकाराश्च सततं प्रयत्नशीलाः भवन्ति । मोक्षाख्यसाध्ये शास्त्रकाराणं वैमत्याभावेऽपि साधनविषये महान् मतभेदः दरीदृश्यते । तत्र चार्वाकनये शरीरोच्छेदः मुक्तिः, बौद्धनये निर्वाणं मुक्तिः, सांख्यनये प्रकृतिपुरुषयोः सम्बन्धलयः मुक्तिः, योगनये समाधिबलेन कैवल्यप्राप्तिरेव मुक्तिः , वैशेषिकनये पदार्थानां साधर्म्याभ्यांतत्त्ववैधर्म्यज्ञानान्निःश्रेयसम्, न्यायनये षोडशपदार्थानां तत्त्वज्ञानान्मुक्तिः, मीमांसकमते नित्यसुखाभिर्व्यक्तिः मुक्तिः, अद्वैतवेदान्तादि नये च अज्ञाननिवृत्तौ मुक्तिर्भवतीति । किन्तु गौडीयवैष्णवसम्प्रदाये कृष्ण एव परमतत्त्वं भवति, तस्य कृष्णस्य प्राप्तिरेव मुक्तिरिति गौडीयवैष्णवाः प्रवदन्ति । गौडीयवैष्णवसम्प्रदायस्य प्रवर्तको भवति महाप्रभुश्रीचैतन्यः । तस्य महोदयस्य कस्यापि ग्रन्थस्य संरचना यद्यपि नास्ति तथापि तस्य उपदेशः शिष्यपरम्पराक्रमेण निबद्धोऽस्ति । श्रीचैन्यमहाप्रभोः अनुगामिनः आचार्याः सन्ति –श्रीजीवगोस्वामी–श्रीरूपगोस्वामी–श्रीबलदेवविद्याभूषण–श्रीकृष्णदासकविराजादयः। महर्षिवादरायण-वेदव्यासकृतभागवतपुराणस्य वाणीं उपजीव्यत्वेन स्वीकृत्य श्रीजीवगोस्वामिपादैः ब्रह्मपरमात्मा- भगवान् इति तत्त्वत्रयं परब्रह्मणःस्वरूपं भवतीति प्रतिपादितम् । परब्रह्मणः निर्विशेषावस्था एव ब्रह्म भवति । सर्वशक्तिसम्पन्नं सर्वैस्वर्यसम्पन्नं च ब्रह्म भगवच्छब्दवाच्यं भवति । तथाचोक्तं - " ब्रह्मच तदीयनिर्विशेषाविर्भावत्वेन तदन्तर्भावविवक्षया........ " (तत्त्वसन्दर्भः. पृ. 93) । एवञ्च एतेषां नये जीवब्रह्मणोः भेदसम्बन्धस्तु यथा सत्यं भवति तथैव अभेदसम्बन्धोऽपि सत्यं भवति । प्रकृते यद्यपि अद्वितीयं ब्रह्म भवति तथापि स सम्बन्धः शक्तिरूपेण शक्तिमद्रूपेण विराजते । तथाहि - " अथ एकमेव स्वरूपं शक्तित्वेन शक्तिमत्त्वेन च विराजते " इति । (षट्सन्दर्भ. पृ. 186) ।

तत्रसंसारमुक्तेः प्रथमः मार्गः कः इति जिज्ञासायां गौडीयवैष्णवाचार्याः निगदन्ति भक्तिरेव जीवानां संसारमुक्तेः प्रधानतमः मार्गः । भवच्छक्तिस्वरूपिणी मायाशक्तिर्भवति । मायावशात् जीवानां स्वरूपज्ञानमावृतं

# व्यासश्रीः
# VYĀSAŚRĪḤ

**Impact Factor 7.747**

**(A Refereed Research Journal)**

**January-June 2024**

**Date of Publication: 30.06.2024**

**: Chief Editor:**

Dr. Buddheswar Sarangi

**: Associate Editors:**

Prof. Prasanta Kumar Mahala

Dr. Jagamohan Acharya

Dr. Gyanaranjan Panda

Dr. Swetapadma Satapathy

Dr. Dibakar Dash

Dr. Santosh Majhi

Dr. Priyavrat Mishra

Dr. J. Bali Chakravarthi

Dr. Runima Sharma

*Publisher*

**Padmashree Ramaranjan Mukherjee Chair of**

Maharshi Vyasadev National Research Institute

A Unit of Vyasayanam, Regd. No. 1635-IV-477/04

Vedavyas, Rourkela-4, Odisha

Contact No.: 7003415810, 7044016153

Email: vyasasri12@gmail.com

Website: www.vyasasri.com

# सूचीपत्रम्


| | | |
|---|---|---|
| Editorial Board | | (I) |
| प्रास्ताविकम् | | (IV) |
| Certificate of impact factor | | (VI) |
| Guideline | | (VII) |
| सृष्टिः | स्रष्टा | पृष्ठम् |
| 1. न्यायशास्त्रदिशा छलतत्त्वविमर्शः | प्रो. बिष्णुपदमहापात्रः | 1 |
| 2. नीतिशतके व्यावहारिकं नैतिकमूल्यम् | डॉ. नवीनकुमारप्रधानः | 11 |
| 3. नैषधीयचरिते सामुद्रिकशास्त्रीयसन्दर्भानामनुशीलनम् | डॉ. ज्योतिप्रसाददाशः | 20 |
| 4. गरुडपुराणे कारकविभक्तिविमर्शः | शुभलक्ष्मी आचार्यः | 25 |
| 5. गव्यूतिः इत्यत्र वलोपवारणविचारः | Prof. G S V Dattatreya Murthy | 31 |
| 6. संस्कृतभाषायाः अवक्षयस्य इतिवृत्तमादाय विरचितानां वङ्गीयरूपकाणां समीक्षणम् | भास्कर-च्याटार्ज्जी | 38 |
| 7. युधिष्ठिरविजयमहाकाव्ये कविवासुदेवस्य काव्यकृतिवैचित्र्यम् | कल्पना नायक | 47 |
| 8. वैदिकज्योतिर्विज्ञाने स्त्रीजातकसमीक्षणम् | सत्यव्रत बेहेरा | 55 |
| 9. रसतत्त्वविमर्शः | Dr. Mithu Rani Maish | 61 |
| 10. स्थानेन्तरतमः | Dr. Santosh Majhi | 68 |
| 11. नैषधीयचरितमहाकाव्ये दण्डनीतेः एकं विहङ्गावलोकनम् | डॉ. प्रदीपकुमारबाग् | 72 |
| 12. श्रीमद्भागवतमहापुराणे योगदर्शनम् | डॉ. अरविन्दकुमारपाण्डेयः | 81 |
| 13. अग्नेः रहस्यनिरुपणम् | डॉ.जगमोहन आचार्यः | 91 |
| 14. आधुनिकशैक्षणिकसिद्धान्तानां पृष्ठभूमौ प्राचीनसंस्कृत-शिक्षणविधिविमर्शः | Dr. A. Shekar Reddy | 96 |
| 15. एकवाक्यतास्वरूपं भेदाश्च | डॉ.प्रज्ञा | 102 |
| 16. सुपद्मव्याकरणे स्वरसन्धिः – एका आलोचना | Atanu Adhya | 108 |

# न्यायशास्त्रदिशा छलतत्त्वविमर्शः

**प्रो. विष्णुपदमहापात्रः**

आचार्यः,न्यायविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

नवदेहली- १६

न्यायशास्त्रे षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति सूत्रकारैः अक्षपादीयैः आदिमसूत्रे संसूचितम्। तथाहि- **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[1]। तत्र षोडशपदार्थेषु चतुर्दशपदार्थो भवति छलपदार्थः। तत्र हेत्वाभासपदार्थस्वरूपनिरूपणानन्तरं छलनिरूपणे का सङ्गतिरिति जिज्ञासायां द्वितीयवाचस्पतिमिश्रः निगदति-"परवाक्योद्भावनीयस्ववाक्यपरिहरणीयहेत्वाभासप्रकरणानन्तरं सत्समाधानोत्तरयो- रस्फूर्तौ तदाभासेनापि वाच्यमिति तद्व्युत्पादनमवसरप्राप्तम्। तत्रापि जातेः स्वव्याघातकत्वेन जघन्यत्वात् छलस्य तात्पर्यतो दुष्टत्वेऽपि नाभ्यर्हितत्वादस्फूतावपि तदेव प्रयोक्तव्यम्। तस्यास्फूरणे जातिरिति विशेषज्ञापनार्थं जातेः पूर्वं छलमुद्दिष्टमित्यनयैव संगत्यादौ छललक्षणप्रकरणम्"[2]। भाष्यकारैरपि 'अथ छलम्' इति वाक्यस्य प्रयोगः हेत्वाभासनिरूपणानन्तरं छलनिरूपणात् प्राक् प्रतिज्ञातम्।

तत्रेदमवधातव्यं यत् वादजल्पवितण्डाभेदेन कथायास्त्रैविध्यं पूर्वमुक्तं सूत्रकारेण। तत्र जल्पं वितण्डाञ्चाश्रित्य यदा प्रतिवादी सदुत्तरविवक्षणे समर्थो न भवति तदा पराजयभयात् तूष्णीं नैव तिष्ठति अपि च असदुत्तरं जल्पति। एतादृशमसदुत्तरं छलं भवति। अस्य छलस्यापि तत्त्वाध्यवसायसंरक्षणे उपयोगित्वं विद्यते। तत्र प्रमाणरूपेण वाचस्पतिमिश्रः द्वितीयः जयन्तभट्टश्च इत्थं भणति- "सदुत्तरापरिस्फूर्तौ छलादिनापि पराहङ्कारखण्डनेन तत्त्वाध्यवसायसंरक्षणार्थं स्ववाक्ये वर्जनार्थं परवाक्यानुयोगार्थं जात्यादिप्रश्ने तदुत्तरार्थमनन्तरं छलादि। तत्रापि प्रयोगदूषणसामान्याद् आदौ छलम्। उभयपक्षसाम्यात् ततो जातिः। कथावसानिकत्वात् सर्वत्र वर्जनीयतया अनन्तरं निग्रहस्थानानि। एतेषां च कथात्रयपरिकरतया अपवर्गोपयोगः"[3]।

"तत्त्वाध्यवसायसंरक्षणं जल्पवितण्डयोः प्रयोजनमुक्तम्। तदङ्गभूतानि च्छलजातिनिग्रहस्थानानि। यद्यपि च वादे केषाञ्चिदभ्यनुज्ञानमस्ति तथापि जल्पवितण्डे एव तेषां प्राचुर्येण क्षेत्रमिति तदौपयिकतया तत्स्वरूपनिरूपणं युक्तमित्युद्देशक्रमेणच्छलस्य निरूपणम्"[4]।